संस्कृत-वार्ता:

22.04.2024

सायम् - 06:20

मुख्यवार्ता:

- अद्य राष्ट्रपतिभवने एकस्मिन् नागरिक-अलङ्करणसमारोहे राष्ट्रपतिना पद्मपुरस्कारा: प्रदीयन्ते।
- उत्तरप्रदेशे नैर्वाचनिक-प्रचाराभियानं द्रुततां भजते। यत्र सर्वेषां राजनीतिकदलानां शीर्षनेतार: नैर्वाचनिकसभा: पथप्रदर्शनादिना सह प्रतिगृहं गत्वा च प्रचारं कुर्वन्त: सन्ति। लोकसभा-निर्वाचनस्य तृतीयचरणाय नामांकन-प्रत्यावर्तनस्य प्रक्रिया च अद्य समाप्ता।
- लोकसभानिर्वाचनस्य प्रत्येक-चरणात् पूर्वं तापतरङ्गस्य स्थिते: निरीक्षणाय निर्वाचनायोगेन कार्यदलस्य घटनं कृतम् अस्ति।
- रक्षामंत्री राजनाथसिंह: सुरक्षास्थिते: प्रत्यक्षनिरीक्षणाय अद्य विश्वस्य सर्वाति उन्नततमं युद्धक्षेत्रं सियाचिन इत्यत्र अगच्छत्।
- सर्वोच्च-न्यायालयेन महाराष्ट्रस्य चतुर्दशवर्षीयाया: कामुककुकृत्यपीडिताया: गर्भावस्थाया: निरसनादेशो प्रदत्त:।
- प्रधानमन्त्रिणा नरेन्द्रमोदिना  चतुरङ्गस्य विलक्षण-प्रतिभया अलङ्कृतस्य गुकेश डी इत्यस्य उत्कृष्टप्रदर्शनस्य प्रशंसा कृता।

राष्ट्रपति:-पद्मपुरस्काराणि

अद्य राष्ट्रपतिभवने एकस्मिन् नागरिक-अलङकरणसमारोहे राष्ट्रपतिना पद्मपुरस्कारा: प्रदीयन्ते। राष्ट्रपतिमुर्मूवर्या प्राक्तनाय उपराष्ट्रपतये एम. वैंकयानायडू इत्यस्मै, भरतनाट्यम् नृत्यविधाया: नृत्यङ्नायै डॉ. पद्मा-सुब्रमण्यम् इत्यस्यै च पद्मविभूषण-सम्माननेन सम्मानायिष्यति। बिंदेश्वर-पाठकाय पद्मविभूषणसम्मानं मरणोपरान्ते प्रदीयते। अभिनेत्रे मिथुनचक्रवर्तिने, गायिकायै उषा-उत्थुप् इत्यस्यै च पद्मभूषणपुरस्कार प्रदास्यते। अन्येषु च पद्मपुरस्कारावाप्तेषु सुविदिता: सन्ति समाजेविन: डॉ. सीताराम-जिन्दल: हृदयरोगविशेषज्ञ: डॉ. तेजस्मधुसूदन: प्राकतन: उत्तरप्रदेशस्य राज्यपाल: राम नाइक: आदय:। पद्मपुरस्कारा: देशस्य सर्वोच्चनागरिक-सम्मानेषु सन्ति। एते पुरस्कारा: पद्मविभूषण, पद्मभूषण, पद्मश्री: च त्रिषु श्रेणीषु विभक्ता: सन्ति।

## उत्तर प्रदेश-मतदानाभियानम्

उत्तरप्रदेशे नैर्वाचनिक-प्रचाराभियानं द्रुततां भजते। यत्र सर्वेषां राजनीतिकदलानां शीर्षनेतार: नैर्वाचनिकसभा: पथप्रदर्शनादिना सह प्रतिगृहं गत्वा च प्रचारं कुर्वन्त: सन्ति। भजपेति दलस्य वरिष्ठनेता प्रधानमंत्री च श्री नरेन्द्र मोदी उत्तरप्रदेशस्य अलीगढ़-जनपदे एकां राजनीतिकजनसभां सम्बोधितवान्। तेन कांग्रेसदलेन सहतस्य सहयोगिदलानाञ्च आलोचनां कुर्वता उक्तं यत् एते कम्युनिष्टविचारसम्बलिता: सन्ति, स्वस्य घोषणापत्रानुसारं ते जनानां सम्पदां सर्वेक्षणं कर्तुमिच्छन्ति, यत्र ते पैत्रकसम्पदामपि न त्यक्ष्यन्ति। प्रधानमन्त्रिणा कांग्रसदस्योपरि कठोरप्रहारं कुर्वता प्रोक्तं यत् एते तस्य वामविचारस्य समर्थनं कुर्वन्त: सन्ति, यस्य विचारेण विश्वस्य नैके देशा: विपन्ना: भ्रष्टाश्च कारिता: सन्तीति। प्रदेशस्य मुख्यमंत्री योगी आदित्यनाथ: अपि अलीगढ़ नैर्वाचनिकसम्मर्देषु प्रातिभाग्यम् अकरोत्। तत्रैव बहव: विपक्षदलीया: नेतार: अपि प्रचारभियाने संलग्ना: सन्ति। बसपेति दलप्रमुखया मायावत्या अद्य बुलंदशहर-जनपदे एका राजनीतिक-जनसभा सम्बोधिता, यत्र च तया भाजपेति दलस्योपरि वाक्प्रहारोऽपि विहित:।

## तृतीयचरणस्य नामांकन प्रत्यावर्तनम्

लोकसभा-निर्वाचनस्य तृतीयचरणाय नामांकन-प्रत्यावर्तनस्य प्रक्रिया अद्य समाप्ता। दशराज्येषु द्वयोः केन्द्रशासितप्रदेशयोश्च समस्त चतुर्णवतिषु लोकसभासनेषु अस्य मासस्य सप्तमे दिनाङ्के मतदानं भविष्यति।

## निर्वाचनायोगः तापतरङ्ग:-

लोकसभानिर्वाचनस्य प्रत्येक-चरणात् पूर्वं तापतरङ्गस्य स्थिते: निरीक्षणाय निर्वाचनायोगेन कार्यदलस्य घटनं कृतम् अस्ति। कार्यदले निर्वाचनआयोगस्य, ऋतु विभागस्य, राष्ट्रिय आपत्प्रबन्धनप्राधिकरणस्य, स्वास्थ्यमन्त्रालयस्य च अधिकारिणः सम्मिलिताः सन्ति। ते तापतरङ्गस्य आर्द्रतायाः प्रभावस्य च समीक्षां करिष्यन्ति, येन प्रत्येकस्य मतदानचरणस्य पञ्चदिनानि पूर्वं कस्या: अपि चिन्तास्पद स्थितेः, उपशमनस्य च उपायेषु विचारो भवेदिति।

राजनाथसिंह:-सियाचिन

रक्षामंत्री राजनाथसिंह: सुरक्षास्थिते: प्रत्यक्षनिरीक्षणाय अद्य विश्वस्य सर्वाति उन्नततमं युक्षक्षेत्रं सियाचिन इत्यत्र अगच्छत्। तत्र तेन विषमऋतौ कठिनक्षेत्रीय परिस्थितिषु च सेवालग्नै: सैनिकै: सह सम्वादो विहित:। स: सैनिकान् सम्बोधयन् उक्तवान् यत् विषमपरिस्थितौ वीरतया दृढसङ्कल्पेन सह च मातृभूम्या: रक्षायै कृतयोगदानं प्रशंसनीयमस्तीति। तेनोक्तं यत् राष्ट्रम् सशस्त्रबलानां सैनिकानां सदैव ऋणं धत्ते। यतो हि तेषां बलिदानबलादेन जनसामान्य: सुक्षितत्वमनुभवति। सियाचिनक्षेत्रं भारतस्य संपभुताया: दृढसंकल्पस्य च प्रतीकभूतमस्ति इति ब्रुबन् रक्षामन्त्रिणा प्रोक्तं यत् सियाचिनक्षेत्रं साहस-धैर्य-दृढसकल्पानाञ्च राजधानी अस्तीति। तेन मेघदूताभियानस्य साफल्यमपि अवसरेऽस्मिन् स्मृतम्। तेनोक्तं यत् मेघदूत-अभियानं देशस्य सैनयेतिहासस्य स्वर्णिमोऽध्याय: अस्ति, यं स्मृत्वा वयं सर्वे गर्वानुभूतिम् अनुभवाम:।

पृथिवीदिवसः

अद्य सम्पूर्णे विश्वे पर्यावरणसंरक्षणप्रयासान् समर्थनाय विश्वपृथिवीदिवसः आचर्यते। 'ग्रह प्रत्युत प्लास्टिक' इति वैश्विक-विषयाधारितम् आयोजनमिदम् प्लास्टिकप्रदूषणस्य गम्भीरसमस्यां प्रकृतौ तस्य हानिकारकप्रभावं च प्रकाशयति। अमेरिकादेशे कैलिफोर्निया-तटानुवर्तिषु विशाल-सागरक्षेत्रेषु-तैल-प्रसारणस्य कतिपयमासेभ्यः अनन्तरं सप्तत्युतरैकोनविंशतिशततमे वर्षे एप्रिल-मासस्य द्वाविंशे दिनाङ्के पृथिवीदिवसस्य आरम्भः अभवत् । अस्य आयोजनस्य पृष्ठे अमेरिकी-सिनेटर-गेलोर्ड् नेल्सन-महोदयस्य, हार्वर्ड-विश्वविद्यालयस्य छात्रस्य डेनिस्-हेस्-इत्यस्य च विचारः आसीत् । दिवसोऽयं अस्मान् पर्यावरणस्य संरक्षणाय, महत्त्वं च स्मारयति, विश्वव्यापीभ्यः जनेभ्यश्च स्वस्थपृथिव्याः, उत्तम-भविष्याय प्रयत्नार्थम् आग्रहं करोति |

सर्वोच्चन्यायालय:-बलात्कार याचिका

सर्वोच्च-न्यायालयेन महाराष्ट्रस्य चतुर्दशवर्षीयाया: कामुककुकृत्यपीडिताया: गर्भावस्थाया: निरसनादेशो प्रदत्त:। अस्या: गर्भावस्था अष्टाविशेति-सप्ताहात्मिका आसीत्। सर्वोच्च न्यायालयेन मुम्बईस्थस्य लोकमान्यतिलकचिकित्सालयस्य संकायप्रमुख: निर्दिष्ट: यत् स: एकस्य चिकित्सासीयदलस्य घटनं करोत्विति।

## अरूणाचप्रदेश-पुनर्मतदानम्

अरूणाचलप्रदेशस्य चतुर्णां विधानसभाक्षेत्राणां अष्टसु मतदान-केन्द्रेषु बुधवासरे पुनमतिदानं भविष्यति। भारतनिर्वाचनयोगेन एकोनविंशे दिनांके कृतमतदानं शून्यकित घोषितमस्ति। बामिंग-न्यापिन विधानसभाक्षेत्रयो: एकैकम् रूमगोंग इत्यत्र द्वे नाचो विधानसभायाश्च चतुर्षु मतदानकेन्द्रेषु बुधवासरे प्रात: षड्वादनत: द्विवादनमध्याह्नं यावत् मतदानप्रक्रिया समाचरिष्यते। एतेषां मतदान-परीक्षणमपि तस्मिन्नेक मतदानानन्तरम् अनुक्षणमेव समारप्स्यते। ध्यातव्यकस्ति यत् प्रदेशेऽस्मिन् गत-शुक्रवासरे लोकसभाविधानसभयो: मतदानम् एकसहैब आसीत्।

## मालदीवस्य निर्वाचनपरिणामाः

मालदीव- निर्वाचनायोगानुसारं मालदीवे पीपुल्स-नेशनल-कांग्रेस PNC इत्यनेन दलेन घोषितेषु प्रथम षडसीति आसनेषु षट्षष्टी आसनानि विजितानि। सूचना अस्ति यत् राष्ट्रपत्युः डॉ. मोहम्मद मुइज्जु इत्यस्य दलस्य कृते निर्वाचनं महत्त्वपूर्णं कठिन-परीक्षणरूपेण आसीत् यत्र भ्रष्टाचारस्य अनेकेषाम् आरोपाणाम् अपि च तस्य नीतीनां च कारणेन आलोचनाभि: आच्छादितम् आसीत् । ऊनविंशत्यधिक-द्विसहस्रतम-वर्षस्य निर्वाचने बहुमतं प्राप्तवत् मुख्यविपक्षिदलं मालदीवियन् डेमोक्रेटिक पार्टीति दलं एकादश आसनैः सह पुनरागतम् । एमडीपी इत्यस्य अध्यक्षः फय्याज इस्माइलः पीएनसी-सांसदान् अभिनन्दितवान् तथा च अवदत् यत् एमडीपी-सांसदाः लोकतान्त्रिकमूल्यानां उन्नयनार्थं सर्वकारेण सह कार्यं कर्तुं सज्जाः भविष्यन्ति तथा च उत्तरदायीविपक्षत्वेन उत्तरदायित्वम् अपि स्वीकरिष्यन्तीति।

## PM-GUKESH:-

प्रधानमन्त्रिणा नरेन्द्रमोदिना चतुरङ्गस्य विलक्षण-प्रतिभया अलङ्कृतस्य गुकेश डी इत्यस्य उत्कृष्टप्रदर्शनस्य प्रशंसा कृता। सामाजिकान्तर्जालपटले एकस्मिन् संदेशे प्रधानमन्त्रिणा उक्तं यत्, देशः गुकेश डी इत्यस्य कृते अतिगर्वितः अस्ति। येन FIDE कैंडिडेट्स इति प्रतिस्पर्धां विजित्य अधुनायावत् सर्वाधिक कनिष्ठतमं कृडकत्वेन कीर्तिमत् स्थापितम्। सः अवदत् यत्, टोरन्टोनगरे कैंडिडेट्स इत्यस्मिन् मध्ये गुकेशस्य विलक्षणोपलब्धिः तस्य असाधारणप्रतिभां समर्पणं च प्रदर्शयति। सः अवदत्, गुकेशस्य उत्कृष्टं प्रदर्शनं संघर्षयात्रा च कोटिशः जनान् प्रेरयतीति।

।। इति वार्ता: ।।